१।१।२। च्छोधितं सञ्जातं फलम् २६०।१।३।२। अस्मिन् पूर्व्वापरकोणानां चतुर्णां फलं योजितं सत्पूर्णं फलं स्यात्। तत्र पूर्व्वकोणयोः फलं यथा दृहङ्गुजोभुजः १४।२२। पूर्व्वापररेखाखण्डं कोटिः१०।०।६।२। अनयोर्घातः १४४।१।५।६२ अस्मात्कोणक्षेत्रफलमेतत्५०।७।७ शोधितं सञ्जातं पूर्व्वकोणयोः फलम्६३।१।६।एतदेवापरकोणयोः, अतोद्विघ्नमेतत् १८६।३।४। पूर्व्वक्षेत्रफलेऽस्मिन्२६०।१।३।२। योजितं सञ्जातं क्षेत्रफलं ५७६।५।०।० अल्पान्तरत्वाद्दोषः ध्वजायसिद्धिश्च। इदं सर्व्वथा नेत्ररमणीयमित्यङ्गीकर्त्तव्यम्। अथ प्रकारान्तरेण समाष्टभुजाष्टास्र कुण्डमाह "माध्ये गुणे वेदयमैर्विभक्ते शक्रैर्निजाद्व्यब्धिलवेन युक्तैः। वृत्ते कृते दिग्विदिशोऽन्तराले गजैर्भुजैः स्यादथवाष्टकोणम्"। माध्ये गुणे—सूत्रे चतुर्विंशतिभक्ते स्वसप्तचत्वारिंशदंशसहितैश्चतुर्दशभिर्व्यासार्द्धेन मण्डले कृते तत्र दिग्विदिशोर्मध्ये कृताष्टसूत्रैः परस्परसंलग्नैरष्टकोणम् प्रकारान्तरेण प्राचीनकृतिरसिकाभिमतं कुण्डं वृत्तमार्जनाद्भवतीति व्याख्या। अथ क्षेत्रफलानयनम् "चन्द्रर्त्तुनन्दाकृतिभि २२६६१ र्व्यासार्द्धे तु समाहते। खखखाभ्राग्निसंभक्ते ३०००० लभ्यन्ते क्रमशोभुजाः" इति भुजमानं १०। ७।४।३।४। "ततःज्याव्यासयोगान्तरघातमूलं व्यासस्तद्रूनो दलितः शरः स्यादिति"। जातः शरः १।०।७।२।६। अथ याम्यभुजस्योभयान्तात् समुखापरभुजप्रान्तद्वयं यावत् सूत्रद्वयं कुर्य्यात्। एवङ्कृते तिर्य्यग्दीर्घचतुरस्रं पार्श्वयोर्विषमभुजचतुरस्रद्वयञ्च स्यात् तत्र व्यासादस्मात्२८।४।६। सकाशाद्द्विगुणं शरं विहाय शेषोदीर्घचतुरस्रस्य भुजः। अथ वा ज्याव्यासवर्गान्तरमूलं भुजः किं शरकरणप्रयासेन२६।३।०। अष्टास्रिभुजएव कोटिः आयते भुजकोटिघातः क्षेत्रफलम् २८८।४।४। अथ विषमभुजचतुर्भुजक्षेत्रफलम् जीवार्द्धशरोनव्यासार्द्धं विषमचतुर्भुजे लम्बः ७।५।५।०। ज्यैव मुखं दीर्घचतुरस्रभुज एव भूः लम्बेन निघ्नं कु२६।३।०मुखै १०।७।४।३। कय२७खण्डम् १८।५।२।१ क्षेत्रफलम् १४४ । २ । ६ । ४ एवमपरस्यापि तयार्योगः ५७६ । १ । ४ ध्वजायसिद्धिश्च। अथवाष्टचतुर्णां फलमानीय वृत्तफलात् संशोध्यापि क्षेत्रफलं स्यादिति अस्मिन्समाष्टभुजे राघवभट्टादिभिरुक्ते शारदातिलकादिवाक्यैः सह महान्विरोधस्तस्मादस्मदुक्तमष्टास्रि नेत्ररम्यं क्षेत्रफलसंवादिसमभुजमेवादरणीयमिति"। अथखातलक्षणं कण्ठलक्षणञ्चाह। "खातं क्षेत्रसमं प्राहुरन्ये तु मेखलां विना। कण्ठोजिनांशमानः स्यादर्कांश इति चापरे"। कुण्डखननं क्षेत्रसमं कुण्डस्य यावान्विस्तार आयामश्च तावत्खननमाद्यमेखलया सहितं कुण्डे कार्यम् योन्यादिकुण्डेषु विस्तारायामयोर्नानात्वाच्चतुरस्रस्यैवायामविस्तारौ ग्राह्यौ। अन्ये तु मेखलां वर्जयित्वा भूमावेव तावत् खननं कार्य्यमित्याहुः। कण्ठोऽपि क्षेत्रचतुर्विंशत्यंशमानः खाताद्बहिः कार्य्यः समन्तादेकाङ्गुलमितः। अन्ये क्षेत्रद्वादशांशपरिमित इति प्राहुरिति व्याख्या। सिद्धान्तशेखरे "खातं कुण्डप्रमाणं स्यादूर्द्ध्वं मेखलया सह" प्रतिष्ठासारसंग्रहे "पञ्चत्रिमेखलोच्छ्रायं त्यक्त्वाऽशेषमधः खनेत्" मोहचूडोत्तरे "हस्तमात्रं खनेत्तिर्यगूर्द्ध्वं मेखलया सहेति"। अथ पक्षान्तरे शारदातिलके "यावान् कुण्डस्य विस्तारः खननं तावदीरितमिति"। प्रयोगसारे "चतुरस्रन्तुःकोष्ठे सूत्रैः कृत्वा यथा पुरा। हस्तमात्रेण तन्मध्ये तावन्निम्नायतं खनेत्"। गणेशविमर्शिन्याम् "चतुर्विंशाङ्गुलायामं तावत्खातसमन्वितमिति" पक्षद्वैधे वयन्तु "स्मृतिद्वैधे तु विषयः कल्पनीयः पृथक् पृथगिति" वचनात् शोभाल्पत्वबहुत्वयोरन्यतरपक्षावाश्रयणीयाविति युक्तमुत्पश्यामः। "औचित्यादर्थात् परिमाणमिति" कात्यायनोक्तिः; ग्रन्थान्तरे "खाताद्बाह्येऽङ्गुलः कण्ठः सर्वकुण्डेष्वयं विधिः। चतुर्विंशतमोभागः कुण्डानामङ्गुलं स्मृतमिति"। एतत्पारिभाषिकमङ्गुलं सर्वत्र बोद्धव्यम्। सोमशम्भौ "बहिरेकाङ्गुलः कण्ठोद्व्यङ्गुलः क्वचिदागमः" इति तेनाद्यः पक्षएव श्रेयान् बहुसंमतत्वात्। अथ मेखलानामधमतादिपक्षमाह "अधमा मेखलैका स्यान्मध्यमं मेखलाद्वयम्। श्रेष्ठास्तिस्रोऽथवा द्वित्रिपञ्चखवसनादिकम्"। एकमेखलापक्षोऽधमो द्विमेखलो मध्यः, त्रिमेखलः श्रेष्ठः। अथ पक्षान्तरे द्विमेखलोऽधमः त्रिमेखलोमध्यः पञ्चमेखलः श्रेयान् एकमेखलोऽधमाधम इति व्याख्या। क्रियासारे "नाभियोनिसमायुक्तं कुण्डं श्रेष्ठं त्रिमेखलम्। कुण्डं द्विमेखलं मध्यन्नीचं स्यादेकमेखलमिति" लक्षणसंग्रहे "मुख्यास्तु पञ्चताः प्रोक्तामध्यमास्तिस्र एव च। द्वे स्यातामधमे पक्षे एका सा त्वधमाधमेति" सोमशम्भुना तु विशेष उक्तः "त्रिमेखलं द्विजे कुण्डं क्षत्रियस्य द्विमेखलम्। मेखलैका तु वैश्यस्येति" अथ खातं समेखलं क्षेत्रसममिति स्पष्टं वदन्मेखलालक्षणमाह "अष्टधा विभजेत्कुण्डशरांशैः सङ्कुनेद्भुवमुपर्य्यनलांशैः। मेखलाविरचयेदपि तिस्रःषड्-